पृथिवीयमासन्दी, यन्ता सुन्वन्, वाजस्य प्राजापत्यं तृचं त्रैष्टुभञ्च, सोमं तृचं तापस आद्या वैश्वदेव्यनिरुक्तानुष्टुब्द्वितीया लिङ्गोक्तदेवता, तृतीयाऽग्नेयी, प्र नो लिङ्गोक्ता गायत्री, सरस्वत्यै सुन्वन्नग्निः सप्तदश लिङ्गोक्तदेवतानि ॥३५॥ [य०अ०९ मं०२०-३४]

अथ राजसूयो– वरुणस्यार्षं, एष ते पार्थिवमग्निनेत्रेभ्यो देवार्षाण्याध्यायाद्दशाद्यानि दैवान्यग्ने सहस्व देवश्रवा देववातश्च भारतावाग्नेयीमनुष्टुभमुपाꣳशोस्त्रीणि रक्षोघ्नानि, सविता द्वे यजमानः ॥ ३६ ॥ [य० अ०९ मं० ३५--४०]

इति० संहितायां नवमोऽध्यायः ।

	नमो मात्रे पृथिव्यै०	बृहस्पतिः इन्द्रः	पृथिवी	
	इयं ते राट् ।	,, ,,	आसन्दी	
	यन्तासि यमनो०	,, ,,	सुन्वन्(यजमानः)	
२३	वाजस्येमं प्रसवः०	,, ,,	प्रजापतिः	त्रिष्टुप्
२४	वाजस्येमां प्रसवः शिश्रिये०	,, ,,	,,	,,
२५	वाजस्य नु प्रसव०	,, ,,	,,	,,
२६	सोमꣳ राजानमवसे०	,, ,, तापसः	विश्वेदेवाः	अनुष्टुप् (अनिरुक्ता)
२७	अर्यमणं बृहस्पतिमिन्द्रं०	,, ,, ,,	लिङ्गोक्ता(अर्यमादयः)	,,
२८	अग्नेऽअच्छा वदेह नः०	,, ,, ,,	अग्निः	,,
२९	प्र नो यच्छत्वर्यमा०	,, ,,	लिङ्गोक्ता(अर्यमादयः)	गायत्री
[अ.१।मं१०] ३०	देवस्य त्वा सवितु०	,, ,,	सविता	
	सरस्वत्यै वाचो यन्तु०	,, ,,	सुन्वन्	
३१	अग्निरेकाक्षरेण०	,, ,,	लिङ्गोक्ता (अग्न्यादयः)	
३२	पूषा पञ्चाक्षरेण०	,, ,,	,, (पूषादयः)	
३३	मित्रो नवाक्षरेण०	,, ,,	,, (मित्रादयः)	
३४	वसवस्त्रयोदशाक्षरेण०	,, ,,	,, (वस्वादयः)	

[इति वाजपेयमन्त्राः समाप्ताः ॥]

[अथ राजसूयः । अ. ९ मं. ३५ आरभ्य अ० १० मं० ३० पर्यन्तम्]

३५	एष ते निर्ऋते भागस्तं०	वरुणः	पृथिवी	
	अग्निनेत्रेभ्यो देवेभ्यः पुरःसद्भ्य०	,, देवाः	देवाः	
३६	ये देवा अग्निनेत्राः पुरःसदः०	,, ,,	,,	
३७	अग्ने सहस्व पृतना०	,, देवश्रवा देववातश्च भारतौ	अग्निः	अनुष्टुप्
[अ.१।मं.१०] ३८	देवस्य त्वा सवितुः०	,,	सविता	
	उपाꣳशोर्वीर्येण जुहोमि०	,,	रक्षोघ्नानि	
३९	सविता त्वा सवानाꣳ०	,,	यजमानः	

अपो देवा आपी त्रिष्टुप्, वृष्ण ऊर्मिर्लिङ्गोक्तानि, मधुमतीरनाधृष्टा आपे, सोमस्य चर्माग्नये लिङ्गोक्तान्यनिभृष्टमापश्च, सधमादो वारुणी त्रिष्टुप्, क्षत्रस्य चतुर्णां तार्प्य-पाण्ड्वाधीवासोष्णीषाणीन्द्रस्य धनुर्मित्रस्य बाहू, त्वयायं धनुर्दधा पण्णामिषव, आविः प्राजापत्यं, पराणि लिङ्गोक्तानि ॥ ३७ ॥ [य० अ० १० मं० १--९]

अवेष्टा मृत्युनाशनं, प्राचीं पञ्चानां यजमानः, प्रत्यस्तमासुरं, मृत्योरोजोऽसि रुक्मो,

---

४०	इमं देवाऽअसपत्नꣳ सुवध्वं०	वरुणः	यजमानः	

अथ० संहितायां दशमोऽध्यायः ।

१	अपो देवा मधुमतीरगृभ्णन्०	वरुणः	आपः	त्रिष्टुप्
२	वृष्णऽऊर्मिरसि०	,,	लिङ्गोक्ता	
३	अर्धेत स्थ राष्ट्रदा०	,,	,,	
४	सूर्यत्वचस स्थ राष्ट्रदा०	,,	,,	
	मधुमतीर्मधुमतीभिः०	,,	आपः	
	अनाधृष्टाः सीदत सहौजसो०	,,	,,	
५	सोमस्य त्विषिरसि तवेव मे०	,,	चर्म	
	अग्नये स्वाहा सोमाय स्वाहा०	,,	लिङ्गोक्ताः(अग्न्यादयः)	
[अ.१ मं.१२] ६	पवित्रे स्थो वैष्णव्यौ ।	,,	,,	
[,, ,,]	सवितुर्वः प्रसव०	,,	आपः	
	अनिभृष्टमसि वाचो बन्धुः०	,,	,,	
७	सधमादो द्युम्निनीरापऽएता०	,,	वरुणः	त्रिष्टुप्
८	क्षत्रस्योल्बमसि ।	,,	तार्प्यम्	
	क्षत्रस्य जराय्वसि ।	,,	पाण्ड्वम्	
	क्षत्रस्य योनिरसि ।	,,	अधीवासं	
	क्षत्रस्य नाभिरसि ।	,,	उष्णीषम्	
	इन्द्रस्य वार्त्रघ्नमसि ।	,,	धनुः	
	मित्रस्यासि वरुणस्यासि ।	,,	बाहू	
	त्वयाऽयं वृत्रं वधेत् ।	,,	धनुः	
	दृवासि रुजासि०	,,	इषवः	
९	आविर्मर्याः ।	,,	प्रजापतिः	
	आविक्तोऽअग्निर्गृहपतिः०	,,	लिङ्गोक्ताः(अग्न्यादयः)	
१०	अवेष्टा दन्दशूकाः ।	,,	मृत्युनाशनम्	
	प्राचीमारोह गायत्री त्वावतु०	,,	यजमानः	
११	दक्षिणामारोह०	,,	,,	
१२	प्रतीचीमारोह०	,,	,,	
१३	उदीचीमारो०	,,	,,	

हिरण्यरूपौ मैत्रावरुणी त्रिष्टुब् यजुरन्ता, सोमस्य सुन्वन्, अपर्वतस्यापी त्रिष्टुब्, विष्णो-स्त्रीणि लिङ्गोक्तानि सुन्वन्, प्रजापते न प्राजापत्या त्रिष्टुब्यजुर्मध्यायममुष्य यजू, रुद्र यद् रौद्रम् ॥ ३८ ॥ [य० अ० १० मं० १०--२०]

इन्द्रस्य लिङ्गोक्तानि, मा ते संवरणः प्राजापत्य ऐन्द्रीं त्रिष्टुभमग्नये लिङ्गोक्तानि, पृथिवि मातर्भूमिर्हꣳसो वामदेवः सौरीꣳ सप्रपञ्चपरब्रह्माभिधायिनीमतिजगतीमियच्छ-तमानावूर्गसि शाखेन्द्रस्य बाहू, स्योनास्यासन्दी, क्षत्रस्याधीवासꣳ, स्योनाꣳ सुन्वन्, निषसाद शुनःशेपो वारुणीं गायत्रीमभिभूरस्यक्षा यजमानो वा, ब्रह्मँस्त्वमामन्त्रणानि

१४	ऊर्ध्वामारोह०	वरुणः	यजमानः	
	प्रत्यस्तं नमुचेः शिरः ।	,,	असुरः	
[अ.१० मं.५]१५	सोमस्य त्विषिरसि०	,,	चर्म	
	मृत्योः पाहि ।	,,	रुक्मः	
	ओजोऽसि सहोऽस्यमृतमसि ।	,,	,,	
१६	हिरण्यरूपाऽउषसो विरोक०	,,	मित्रावरुणौ	यजुरन्ता त्रिष्टुप्
१७	सोमस्य त्वा द्युम्ने०	,,	सुन्वन्	
[अ.९।मं.४०]१८	इमं देवाऽअसपत्नꣳ०	,,	यजमानः	अत्यष्टिः
१९	प्र पर्वतस्य वृषभस्य पृष्ठा०	,,	आपः	त्रिष्टुप्
	विष्णोर्विक्रमणमसि । ०	,,	लिङ्गोक्ता (यजमानः)	
२०	प्रजापते न त्वदेता०	,,	प्रजापतिः	त्रिष्टुप् (यजुर्मध्या)
	रुद्र यत्ते क्रिवि परं नाम०	,,	रुद्रः	
२१	इन्द्रस्य वज्रोऽसि०	,,	लिङ्गोक्ता (रथादयः)	
२२	मा तऽइन्द्र ते वयं०	,, संवरणः प्राजापत्यः	इन्द्रः	त्रिष्टुप्
२३	अग्नये गृहपतये स्वाहा०	,,	लिङ्गोक्ता (अग्न्यादयः)	
	पृथिवि मातर्मा मा हिꣳसी०	,,	भूमिः	
२४	हꣳसः शुचिषद्वसुरन्तरिक्ष०	,, वामदेवः	सूर्यः	अतिजगती
२५	इयदस्यायुरस्यायुर्मयि धेहि०	,,	शतमानौ	
	ऊर्गस्यूर्जं मयि धेहि ।	,,	शाखा	
	इन्द्रस्य वां वीर्यकृतो बाहू०	,,	बाहू	
२६	स्योनासि सुषदासि०	,,	आसन्दी	
	क्षत्रस्य योनिरसि०	,,	अधीवासम्	
	स्योनामासीद०	,,	सुन्वन्	
२७	निषसाद धृतव्रतो०	,, शुनःशेपः	वरुणः	गायत्री
२८	अभिभूरस्येतास्ते०	,,	अक्षाः यजमानः वा	
	ब्रह्मँस्त्वं ब्रह्मासि०	,,	लिङ्गोक्तानि (ब्रह्मादयः)	

पञ्च लिङ्गोक्तानीन्द्रस्य स्फ्योऽग्निः पृथुरात्रेयश्च, स्वाहाकृता अक्षाः, सवित्रा लिङ्गोक्त-देवतम् ॥ ३९ ॥ [य० अ० १० मं० २१--३०]

अथ चरकसौत्रामण्यश्विनोरार्षमश्विभ्यां त्रीणि लिङ्गोक्तानि, वायुः सौमी गायत्री, कुवित्तृचश्च सुकीर्तिः काक्षीवत आद्या सौम्यनिरुक्ता त्रिष्टुब्युवमनुष्टुप्, पुत्रमिव त्रिष्टुबश्विसरस्वतीन्द्रदेवत्ये अश्विसरस्वतीन्द्रदेवत्ये ॥४०॥ [य० अ० १० मं० ३१--३४]

इति० संहितायां दशमोऽध्यायः ॥ १० ॥

इति सर्वानुक्रमसूत्रे प्रथमोऽध्यायः ।

अथ द्वितीयोऽध्यायः ।

अथाग्निं प्रजापतिरपश्यत् साध्या वापश्यन्त्सोऽग्निः पञ्चचितिकः, प्रथमा चितिः प्रजापतेर्द्वितीया देवानां, तृतीयेन्द्राग्न्योर्विश्वकर्मणश्चतुर्थ्यृषीणां, पञ्चमी परमेष्ठिनोऽथ प्रतिकर्मदर्शिनो, युञ्जानोऽष्टौ सावित्राणि सवितापश्यदाद्या तृतीया चानुष्टुप्, चतुर्थी

	इन्द्रस्य वज्रोऽसि०	वरुणः	स्फ्यः	
२९	अग्निः पृथुर्धर्मणस्पति०	,,	अग्निः	
	स्वाहाकृताः सूर्यस्य०	,,	अक्षाः	
३०	सविता प्रसविता०	,,	लिङ्गोक्ता (सवित्रादयः)	

[इति राजसूयः समाप्तः ।]

[अथ चरकसौत्रामणी । अ. १० मं. ३१—३४]

३१	अश्विभ्यां पच्यस्व०	अश्विनौ	लिङ्गोक्ता (सुरा)	
	वायुः पूतः पवित्रेण०	,,	सोमः	गायत्री
३२	कुविदङ्ग यवमन्तो०	,, सुकीर्तिः काक्षीवतः ,,	अनिरुक्ता	त्रिष्टुप्
३३	युवꣳ सुराममश्विना०	,, ,, ,,	अश्विसरस्वतीन्द्राः	अनुष्टुप्
३४	पुत्रमिव पितरावश्विनो०	,, ,, ,, ,,		त्रिष्टुप्

इति सर्वानुक्रमणीये प्रथमोऽध्यायः ॥

अथ सर्वानुक्रमसूत्रे द्वितीयोऽध्यायः ।

अथ० संहितायां एकादशोऽध्यायः ।

[अथ अग्निचयनमंत्राः- अ. ११ आरभ्य अ. १८ समाप्ति पर्यन्तं । ऋषयः प्रजापतिः साध्याः वा]

१	युञ्जानः प्रथमं मन०	प्रजापतिः	साध्याः	सविता	सविता	अनुष्टुप्
२	युक्तेन मनसा वयं०	,,	,,	,,	,,	गायत्री
३	युक्त्वाय सविता देवान्०	,,	,,	,,	,,	अनुष्टुप्
४	युञ्जते मनऽउत युञ्जते०	,,	,,	,,	,,	जगती

पष्ठ्यौ जगत्यौ, द्वितीया गायत्री, पञ्चमी त्रिष्टुबिमं नो यजुरन्ते गायत्र्यनवसानाऽऽद-देऽग्निर्हस्तेऽनुष्टुब् यजुरन्ता ॥ १ ॥ [य० अ० ११ मं० १--११]

प्रतूर्त्तन्नाभानेदिष्ठ आश्वीमास्तारपंक्तिर्युञ्जाथां कुश्रिर्गार्दभीं गायत्रीं, योगे-योगे शुनःशेप आजीं, प्रतूर्वन्त्रिष्टुब्विराड्रूपा यजुर्गर्भोरु यजुः, पृथिव्यास्त्रीण्याग्नेयान्यन्वग्निरा ग्नेयीं त्रिष्टुभं पुरोधस, आगत्य मयोभुव आश्वीमनुष्टुभमाक्रम्यानुष्टुब्द्यौस्ते बृहत्युत्क्राम विराडुदक्रमीत्त्रिष्टुबा त्वा द्वे गृत्समद आग्नेय्यौ, परि सोमको गायत्रीं, परि त्वा पायुरनुष्टुभं, त्वमग्ने गृत्समदो जगतीम् ॥ २ ॥ [य० अ० ११ मं० १२--२७]

५	युजे वां ब्रह्म पूर्व्यं०	प्रजापतिः	साध्याः,	सविता	सविता	त्रिष्टुप्
६	यस्य प्रयाणमन्वन्य०	,,	,,	,,	,,	जगती
७	देव सवितः प्रसुव०	,,	,,	,,	,,	
८	इमं नो देव सवित०	,,	,,	,,	,,	
	ऋचा स्तोमꣳ समर्धय०	,,	,,	,,	,,	गायत्री अनवसाना
९	देवस्य त्वा सवितुः ।	,,	,,		,,	
	आददे गायत्रेण छन्दसा०	,,	,,		अग्निः	
१०	अग्निरसि नार्यसि०	,,	,,		,,	
११	हस्त आधाय सविता०	,,	,,		,,	अनुष्टुप् यजुरन्ता
	आनुष्टुभेन छन्दसाङ्गिरस्वत् ।	,,	,,		,,	,,
१२	प्रतूर्त्तं वाजिन्नाद्रव०	,,	,,	नाभानेदिष्ठः	अश्वः	आस्तारपंक्तिः
१३	युञ्जाथाꣳ रासभं युव०	,,	,,	कुश्रिः	गर्दभः	गायत्री
१४	योगे योगे तवस्तरं०	,,	,,	शुनःशेपः	अजः	,,
१५	प्रतूर्वन्नेह्यवक्रामन्नशस्ती०	,,	,,		(अश्वः)	त्रिष्टुप् विराड्रूपा
१६	पृथिव्याः सधस्थादग्निं०	,,	,,		अग्निः	
१७	अन्वग्निरुषसामग्र०	,,	,,	पुरोधसः	,,	त्रिष्टुप्
१८	आगत्य वाज्यध्वानꣳ०	,,	,,	मयोभुवः	अश्वः	अनुष्टुप्
१९	आक्रम्य वाजिन्पृथिवी०	,,	,,		,,	,,
२०	द्यौस्ते पृष्ठं पृथिवी०	,,	,,		,,	बृहती
२१	उत्क्राम महते सौभगाया०	,,	,,		,,	विराट्
२२	उदक्रमीद् द्रविणोदा०	,,	,,		,,	त्रिष्टुप्
२३	आ त्वा जिघर्मि मनसा०	,,	,,	गृत्समदः	अग्निः	,,
२४	आ विश्वतः प्रत्यञ्चं जिघ०	,,	,,	,,		,,
२५	परि वाजपतिः कवि०	,,	,,	सोमकः	,,	गायत्री
२६	परि त्वाग्ने पुरं वयं०	,,	,,	पायुः	,,	अनुष्टुप्
२७	त्वमग्ने द्युभिस्त्वमाशुशुक्षणि०	,,	,,	गृत्समदः	,,	जगती

पृथिव्या आग्नेयमपां पुष्करपर्णꣳ स्वराट्पंक्तिः, शर्म द्वे अनुष्टुभौ कृष्णाजिनपुष्करपर्णे, पुरीष्योऽग्निस्त्वामग्ने तृचं भरद्वाज आग्नेयं गायत्रꣳ, सीद होतर्देवश्रवा देववातश्च त्रिष्टुभं, नि होता गृत्समदः, सꣳसीदस्व प्रस्कण्वो बृहतीम् ॥ ३ ॥ [य० अ० ११ मं० २७--३७]

अपो देवीः सिन्धुद्वीप आपीं न्यंकुसारिणीꣳ, सं ते त्रिष्टुप् पार्थिवोऽद्भ्यो वायव्योऽर्धः, सुजातोऽनुष्टुबाग्नेय्युदु तिष्ठ विश्वमनाः पथ्याबृहतीमूर्ध्वः कण्व उपरिष्टाद्बृहतीꣳ, स जातास्त्रितस्त्रिष्टुभꣳ, स्थिरो रासभेय्यनुष्टुबुष्णिग्वा, शिवो भवाजी पथ्याबृहती, प्रैतु लिङ्गोक्ता महापंक्तिस्त्र्यवसानाग्ने गायत्र्येकपदाग्नेय्यृतमग्निमाग्नेये, ओषधयस्त्रिष्टुबनुष्टुभावोषधिदेव-

[अ.१मं.१०]२८	देवस्य त्वा सवितुः प्रसवे०	प्रजापतिः	साध्याः	सविता		
	पृथिव्याः सधस्थादग्निं०	,,	,,	अग्निः		
२९	अपां पृष्ठमसि योनिरग्नेः०	,,	,,	पुष्करपर्णम्	स्वराट् पंक्ति	
३०	शर्म च स्थो वर्म च स्थो	,,	,,	कृष्णाजिनपुष्करपर्णे	अनुष्टुप्	
३१	संवसाथाꣳ स्वर्विदा०	,,	,,	,,	,,	
३२	पुरीष्योऽसि विश्वभरा०	,,	,,	अग्निः	,,	
	त्वामग्ने पुष्करादध्यथर्वा०	,,	,, भारद्वाजः	,,	गायत्री	
३३	तमु त्वा दध्यङ्ङृषिः०	,,	,, ,,	,,	,,	
३४	तमु त्वा पाथ्यो वृषा०	,,	,, ,,	,,	,,	
३५	सीद होतः स्व उ लोके०	,,	,,देवश्रवा देववातश्च	,,	त्रिष्टुप्	
३६	नि होता होतृषदने०	,,	,, गृत्समदः	,,	,,	
३७	सꣳसीदस्व महाँऽअसि०	,,	,, प्रस्कण्वः	,,	बृहती	
३८	अपो देवीरुपसृज०	,,	,, सिन्धुद्वीपः	आपः	न्यंकुसारिणी	
३९	सं ते वायुर्मातरिश्वा दधातू०	,,	,,	पृथिवी	त्रिष्टुप्	
	यो देवानां चरसि प्राणथेन०	,,	,,	वायुः	,,	
४०	सुजातो ज्योतिषा सह०	,,	,,	अग्निः	अनुष्टुप्	
४१	उदु तिष्ठ स्वध्वरावꣳ०	,,	,, विश्वमनाः	,,	पथ्याबृहती	
४२	ऊर्ध्वऽऊ षु ण ऊतये०	,,	,, कण्वः	,,	उपरिष्टाद्बृहती	
४३	स जातो गर्भोऽसि०	,,	,, त्रितः	(अश्वः)	त्रिष्टुप्	
४४	स्थिरो भव वीड्वङ्ग०	,,	,,	रासभः	अनुष्टुबुष्णिग्वा	
४५	शिवो भव प्रजाभ्यो०	,,	,,	अजः	पथ्याबृहती	
४६	प्रैतु वाजी कनिक्रद०	,,	,,	लिङ्गोक्ता	महापंक्तिः त्र्यवसाना	
	अग्न आयाहि वीतये ।	,,	,,	अग्निः	एकपदा गायत्री	
४७	ऋतꣳ सत्य० ।	,,	,,	,,		

त्ये, व्यस्यन्नाग्नेयोऽर्द्धर्चो, वि पाजसोत्कीलः कात्य आग्नेयीं त्रिष्टुभम् ॥ ४ ॥ [य० अ० ११ मं० ३८--४९]

आपो ह्यापश्च सिन्धुद्वीपस्तृचं गायत्रं, मित्र उपरिष्टाद्बृहती मैत्री, रुद्रा अनुष्टुब् रौद्री, सꣳसृष्टां द्वे सिनीवालीदेवत्ये, उखामादित्या, मखस्य मृत्पिण्डो, वसवस्त्वा लिङ्गोक्तानि सर्वत्रादित्यै रास्नादितिरौखं, कृत्वायादित्योष्णिगदितिरावटं, देवानां पञ्चौखानि, मित्रस्य विश्वामित्रो मैत्रीं गायत्रीं, देवस्त्वा सावित्री बृहत्युत्थाय पूर्वोऽर्द्धर्च औष, उत्तरो मैत्रः ॥ ५ ॥ [य० अ० ११ मं ५०--६५]

	अग्निं पुरीष्यमङ्गिरस्वद्भरामः ।	प्रजापतिः	साध्याः		अग्निः	
	ओषधयः प्रतिमोदध्वं०	,,	,,		ओषधयः	त्रिष्टुप्
	व्यस्यन्विश्वा अनिरा०	,,	,,		अग्निः	,,
४८	ओषधयः प्रति गृभ्णीत०	,,	,,		ओषधयः	अनुष्टुप्
४९	वि पाजसा पृथुना शोशुचानो०	,,	,,	उत्कीलःकात्यः	अग्निः	त्रिष्टुप्
५०	आपो हि ष्ठा मयोभुवस्ता०	,,	,,	सिन्धुद्वीपः	आपः	गायत्री
५१	यो वः शिवतमो रस०	,,	,,	,,	,,	,,
५२	तस्माऽअरं गमाम वो०	,,	,,	,,	,,	,,
५३	मित्रः सꣳसृज्य पृथिवीं०	,,	,,		मित्रः	उपरिष्टाद्बृहती
५४	रुद्राः सꣳसृज्य पृथिवीं०	,,	,,		रुद्राः	अनुष्टुप्
५५	सꣳसृष्टां वसुभी रुद्रैः०	,,	,,		सिनीवाली	,,
५६	सिनीवाली सुकपर्दा०	,,	,,		,,	,,
५७	उखां कृणोतु शक्त्या०	,,	,,		अदितिः	अनुष्टुप्
	मखस्य शिरोऽसि ।	,,	,,		मृत्पिण्डः	
५८	वसवस्त्वा कृण्वन्तु०	,,	,,		लिङ्गोक्ता(उखा)	
५९	अदित्यै रास्नासि ।	,,	,,		रास्ना	
	अदितिष्टे बिलं गृभ्णातु ।	,,	,,		उखा	
	कृत्वाय सा महीमुखां०	,,	,,		अदितिः	उष्णिक्
६०	वसवस्त्वा धूपयन्तु०	,,	,,		लिंगोक्ता (उखा)	
६१	अदितिष्ट्वा देवी०	,,	,,		अवटः	
	देवानां त्वा पत्नी०	,,	,,		उखा	
६२	मित्रस्य चर्षणीधृतो०	,,	,,	विश्वामित्रः	मित्रः	गायत्री
६३	देवस्त्वा सवितोद्वपतु०	,,	,,		सविता	बृहती
६४	उत्थाय बृहती भवोदु०	,,	,,		उषा (उखा)	,,
	मित्रैतां तऽउखां०	,,	,,		मित्रः	,,
६५	वसवस्त्वाच्छृन्दन्तु०	,,	,,		लिंगोक्ता(उखा)	

आकूतिं लिङ्गोक्तान्यौद्भ्रभणानि, मा स्वौरव्यौ गायत्रीत्रिष्टुभावग्निश्च पाद आग्नेयो, द्रुवं नः सोमाहुतिराग्नेयीं गायत्रीं, परस्या विरूप आङ्गिरसः, परमस्या आरुणिरनुष्टुभं, यदग्ने द्वे जमदग्निरहरहर्नाभानेदिष्ठस्त्रिष्टुभौ, याः सेना अनुष्टुभः, सर्वा आग्नेय्योऽन्त्यो-परिष्टाद्बृहती ॥ ६ ॥ [य० अ० ११ मं० ६६-८३]

इति० संहितायां एकादशोऽध्यायः ।

दृशानो वत्सप्रीस्त्रिष्टुभञ्च रौक्मीं, नक्तोषासा कुत्स आग्नेयीं, विश्वा श्यावाश्वः सावित्रीं जगतीञ्च, सुपर्णः कृतिश्चतुरवसाना गारुत्मी विषघ्नी, विष्णोर्लिङ्गोक्तान्यक्रन्ददुत्सप्री-

६६	आकूतिमग्निं प्रयुजꣳ स्वाहा०	प्रजापतिः	साध्याः	लिङ्गोक्ता(अग्न्यादयः)	
[अ.४ मं८] ६७	विश्वो देवस्य नेतु०	,,	,, स्वस्त्यात्रेयः	सविता	अनुष्टुप्
६८	मा सु भित्था मा सु०	,,	,,	उखा	गायत्री
	अग्निश्चेदं करिष्यथः ।	,,	,,	अग्निः	,,
६९	दꣳहस्व देवि पृथिवि०	,,	,,	उखा	त्रिष्टुप्
७०	द्रुवन्नः सर्पिरासुतिः०	,,	,, सोमाहुतिः	अग्निः	गायत्री
७१	परस्याऽअधि संवतो०	,,	,, विरूप आंगिरसः	,,	,,
७२	परमस्याः परावतो०	,,	,, आरुणिः	अग्निः	अनुष्टुप्
७३	यदग्ने कानि-कानि चि०	,,	,, जमदग्निः	,,	,,
७४	यदस्युपजिह्विका०	,,	,, ,,	,,	,,
७५	अहरहरप्रयावं०	,,	,, नाभानेदिष्ठः	,,	त्रिष्टुप्
७६	नाभा पृथिव्याः समिधान०	,,	,, ,,	,,	,,
७७	याः सेना अभीत्वरी०	,,	,,	,,	अनुष्टुप्
७८	दꣳष्ट्राभ्यां मलिम्लून्०	,,	,,	,,	,,
७९	ये जनेषु मलिम्लव०	,,	,,	,,	,,
८०	योऽअस्मभ्यमराती०	,,	,,	,,	,,
८१	सꣳशितं मे ब्रह्म०	,,	,,	,,	,,
८२	उदेषां बाहू अतिर०	,,	,,	,,	,,
८३	अन्नपतेऽन्नस्य नो देहि०	,,	,,	,,	उपरिष्टाद्बृहती

अथ० संहितायां द्वादशोऽध्यायः ।

१	दृशानो रुक्मऽउर्व्या०	प्रजापतिः,	साध्याः, वत्सप्रीः	रुक्मम्	त्रिष्टुप्
२	नक्तोषासा समनसा विरूपे०	,,	,, कुत्सः	अग्निः	,,
३	विश्वा रूपाणि प्रतिमुञ्चते०	,,	,, श्यावाश्वः	सविता	जगती
४	सुपर्णोऽसि गुरुत्मान्०	,,	,,	गरुत्मान्	कृतिः चतुरवसाना
५	विष्णोः क्रमोऽसि सपत्नहा०	,,	,,	लिङ्गोक्ता(उख्याग्निः)	
६	अक्रन्ददग्निः स्तनयन्निव०	,,	,, वत्सप्रीः	अग्निः	त्रिष्टुप्

राग्नेयीं त्रिष्टुभमग्न ऊर्ध्ववृहत्यग्ने महावृहती, पुनर्गायत्र्यावा त्वा ध्रुवोऽनुष्टुभमुदुत्तमꣳ शुनःशेपो वारुणीं त्रिष्टुभमग्ने त्रित आग्नेयीꣳ, हꣳस उक्ता जगतीह यजुरन्ताऽन्ते बृह-द्यजुः, सीद त्वमाग्नेयी त्रिष्टुबन्तरग्नेऽनुष्टुभौ ॥ ७ ॥ [य० अ० १२ मं० १–१७]

दिवस्पर्याग्नेयं त्रैष्टुभं द्वादशर्चं वत्सप्रीर्भालन्दनः, समिधाग्निं विरूपाक्ष आङ्गिरस आग्नेयं गायत्रमुदु त्वा तापसोऽनुष्टुभं, प्रेदनुष्टुप्, प्र-प्रायमाग्नेयीं वसिष्ठास्त्रिष्टुभमापो देवी-

७	अग्नेऽभ्यावर्तिन्नभि०	प्रजापतिः	साध्याः		अग्निः	ऊर्ध्ववृहती
८	अग्नेऽअङ्गिरः शतं ते	,,	,,		,,	महावृहती
९	पुनरूर्जा निवर्तस्व०	,,	,,		,,	गायत्री
१०	सह रय्या निवर्तस्व७	,,	,,		,,	,,
११	आ त्वाहार्षमन्तरभू०	,,	,, ध्रुवः		,,	अनुष्टुप्
१२	उदुत्तमं वरुणपाशमस्म०	,,	,, शुनःशेपः		वरुणः	त्रिष्टुप्
१३	अग्ने बृहन्नुषसामूर्ध्वो०	,,	,, त्रितः		अग्निः	,,
[अ.१०मं.२४] १४	हꣳसः शुचिषद्वसु०	,,	,, वामदेव		सूर्यः	जगती यजुरंता
१५	सीद त्वं मातुरस्याऽउपस्थे०	,,	,,		अग्निः	त्रिष्टुप्
१६	अन्तरग्ने रुचा त्व०	,,	,,		,,	अनुष्टुप्
१७	शिवो भूत्वा मह्यमग्ने०	,,	,,		,,	,,
१८	दिवस्परि प्रथमं जज्ञे अग्नि०	,,	,, वत्सप्रीर्भालन्दनः		,,	त्रिष्टुप्
१९	विद्मा ते अग्ने त्रेधा त्रयाणि०	,,	,, ,,	,,	,,	,,
२०	समुद्रे त्वा नृमणा०	,,	,, ,,	,,	,,	,,
२१	अक्रन्ददग्निः स्तनयन्निव०	,,	,, ,,	,,	,,	,,
२२	श्रीणामुदारो धरुणो रयीणां०	,,	,, ,,	,,	,,	,,
२३	विश्वस्य केतुर्भुवनस्य गर्भ०	,,	,, ,,	,,	,,	,,
२४	उशिक्पावकोऽअरतिः०	,,	,, ,,	,,	,,	,,
२५	दृशानो रुक्मऽउर्व्या०	,,	,, ,,	,,	,,	,,
२६	यस्तेऽअद्य कृणवद्भद्रशोचे०	,,	,, ,,	,,	,,	,,
२७	आ तं भज सौश्रवसेष्वग्न०	,,	,, ,,	,,	,,	,,
२८	त्वामग्ने यजमाना अनु०	,,	,, ,,	,,	,,	,,
२९	अस्ताव्यग्निर्नराꣳ सुशेवो०	,,	,, ,,	,,	,,	,,
[अ.३।मं.१] ३०	समिधाग्निं दुवस्यत०	,,	,, विरूपाक्ष आंगिरसः		,,	गायत्री
३१	उदु त्वा विश्वे देवा०	,,	,, तापसः		,,	अनुष्टुप्
३२	प्रेदग्ने ज्योतिष्मान्याहि०	,,	,,		,,	,,
[अ.१२।६,२१] ३३	अक्रन्ददग्निः स्तनयन्निव०	,,	,, वत्सप्रीः		,,	त्रिष्टुप्
३४	प्र-प्रायमग्निर्भरतस्य शृण्वे०	,,	,, वसिष्ठः		,,	,,
३५	आपो देवीः प्रतिगृभ्णीत०	,,	,,		आपः	,,

राप्यप्स्वग्ने विरूप आग्नेयीं गायत्रीं, गर्भो असि तिस्रोऽनुष्टुभो, बोधा मे दीर्घतमास्त्रिष्टुभꣳ, स बोधि सोमाहुतिराग्नेयीं यजुरन्तां गायत्रीं यजुर्वैश्वकर्मणं, पुनस्त्वा त्रिष्टुबाग्नेयी ॥ ८ ॥ [य० अ० १२ मं० १८-४४]

अपेत लिङ्गोक्तबहुदेवत्या, संज्ञानमूपदेवत्यमग्नेः सिकताश्रितः परिश्रितोऽयꣳ सः पञ्चर्चमाग्नेयं त्रैष्टुभं विश्वामित्रश्चतुर्थ्यनुष्टुबयं तेऽनुष्टुप्, चिदैष्टके, लोकं लिङ्गोक्ताऽनुष्टुप्, ता अस्यापीं प्रियमेध ऐन्द्र, इन्द्रं जेता माधुच्छन्दस ऐन्द्रीꣳ, समितं चतस्रो ह्यग्निदेवत्या

३६	अप्स्वग्ने सधिष्टव०	प्रजापतिः	साध्याः	विरूपः	अग्निः	गायत्री
३७	गर्भोऽअस्योषधीनां०	,,	,,		,,	अनुष्टुप्
३८	प्रसद्य भस्मना योनि०	,,	,,		,,	,,
३९	पुनरासद्य सदन०	,,	,,		,,	,,
[अ.१२मं९] ४०	पुनरूर्जा निवर्तस्व	,,	,,		,,	गायत्री
[अ.१२मं१०] ४१	सह रय्या निवर्तस्वा०	,,	,,		,,	,,
४२	बोधा मेऽअस्य वचसो यविष्ठ०	,,	,,	दीर्घतमाः	,,	त्रिष्टुप्
४३	स बोधि सूरिर्मघवा०	,,	,,	सोमाहुतिः	,,	गायत्री (यजुरन्ता)
	विश्वकर्मणे स्वाहा०	,,	,,	,,	विश्वकर्मा	
४४	पुनस्त्वादित्या रुद्रा वसवः०	,,	,,		अग्निः	त्रिष्टुप्
४५	अपेत वीत वि च सर्पतातो०	,,	,,	लिङ्गोक्ता बह्व्यो देवताः		,,
४६	संज्ञानमसि कामधरणं मयि०	,,	,,		ऊषः	
	अग्नेर्भस्मास्यग्नेः पुरीषमसि।	,,	,,		सिकता	
	चित स्थ परिचित०	,,	,,		परिश्रितः	
४७	अयꣳसोऽअग्निर्यस्मिन्०	,,	,,	विश्वामित्रः	अग्निः	त्रिष्टुप्
४८	अग्ने यत्ते दिवि वर्चः०	,,	,,	,,	,,	,,
४९	अग्ने दिवोऽअर्णमच्छा०	,,	,,	,,	,,	,,
५०	पुरीष्यासोऽअग्नयः०	,,	,,	,,	,,	अनुष्टुप्
५१	इडामग्ने पुरुदꣳसꣳ सनिꣳ०	,,	,,	,,	,,	त्रिष्टुप्
[अ.३।१४] ५२	अयं ते योनिर्ऋत्वियो०	,,	,,	देवश्रवा-देववातौ भारतौ	,,	अनुष्टुप्
५३	चिदसि तया देवतयाङ्गि०	,,	,,		इष्टका	
	परिचिदसि तया०	,,	,,		,,	
५४	लोकं पृण छिद्रं पृण०	,,	,,	लिङ्गोक्ता(लोकंपृणा)		अनुष्टुप्
५५	ताऽअस्य सूददोहसः०	,,	,,	प्रियमेधः ऐन्द्रः	आपः	,,
५६	इन्द्रं विश्वाऽअवीवृधन्०	,,	,,	जेता माधुच्छंदसः	इन्द्रः	,,

उष्णिगुपरिष्टाद्बृहत्युष्णिक्पंक्तयो, मातेवोखास्तुतिस्त्रिष्टुप् ॥९॥ [य०अ०१२मं०४५-६१]

असुन्वन्तं नैऋतं तृचं त्रैष्टुभं, यं ते यजमानदेवत्या, नमो विराड् भूतिदेवत्यैकपदा, निवेशन ऐन्द्रीं त्रिष्टुभं विश्वावसुर्देवगन्धर्वः, सीरा द्वे सीरदेवत्ये बुधः सौम्यो गायत्री-त्रिष्टुभौ, शुनं चतस्रः सीतादेवत्याः कुमारहारितो द्वे त्रिष्टुभौ तृतीया पंक्तिश्चतुर्थ्यनुष्टुब्, विमुच्यध्वमानडुही गायत्री, सजूर्लिङ्गोक्तदेवतम् ॥१०॥ [य० अ०१२मं०६२–७४]

या ओषधीः सप्तविंशतिमनुष्टुभ ओषधिस्तुतिमाथर्वणो भिषङ्, मुञ्चन्तु वन्धुर्द्वा-

	५७	समितꣳ सङ्कल्पेथाꣳ०	प्रजापतिः	साध्याः	द्वौ अग्नी	उष्णिक्
	५८	सं वां मनाꣳसि सं व्रता०	,,	,,	,,	उपरिष्टाद्बृहती
	५९	अग्ने त्वं पुरीष्यो०	,,	,,	,,	उष्णिक्
[अ.५।३]	६०	भवतं नः समनसौ०	,,	,,	,,	पंक्तिः
	६१	मातेव पुत्रं पृथिवी०	,,	,,	उखा	त्रिष्टुप्
	६२	असुन्वन्तमयजमानमिच्छ०	,,	,,	निर्ऋतिः	,,
	६३	नमः सु ते निर्ऋते०	,,	,,	,,	,,
	६४	यस्यास्ते घोर आसन्०	,,	,,	,,	,,
	६५	यं ते देवी निर्ऋतिराबबन्ध०	,,	,,	यजमानः	त्रिष्टुप्
		नमो भूत्यै येदं चकार ।	,,	,,	भूतिः	एकपदा विराट्
	६६	निवेशनः सङ्गमनो वसूनां०	,,	,, विश्वावसुः देवगंधर्वः	इन्द्रः	त्रिष्टुप्
	६७	सीरा युञ्जन्ति कवयो०	,,	,, बुधः सौम्यः	सीरः	गायत्री
	६८	युनक्त सीरा वि युगा तनुध्वं०	,,	,, ,, ,,	,,	त्रिष्टुप्
	६९	शुनꣳ सु फाला विकृषन्तु०	,,	,, कुमारहारितः	सीता	,,
	७०	घृतेन सीता मधुना समज्यतां०	,,	,, ,, ,,	,,	,,
	७१	लाङ्गलं पवीरवत्०	,,	,, ,,	,,	पंक्तिः
	७२	कामं कामदुघे धुक्ष्व०	,,	,, ,,	,,	अनुष्टुप्
	७३	विमुच्यध्वमघ्न्या०	,,	,,	अनड्वत्	गायत्री
	७४	सजूरब्दोऽअयवोभिः०	,,	,,	लिङ्गोक्ता(अब्दादयः)	
	७५	या ओषधीः पूर्वा जाता०	,,	,, आथर्वणो भिषक्	ओषधयः	अनुष्टुप्
	७६	शतं वोऽअम्ब धामानि०	,,	,, ,, ,,	,, ,,	,,
	७७	ओषधीः प्रतिमोदध्वं	,,	,, ,, ,,	,, ,,	,,
	७८	ओषधीरिति मातर०	,,	,, ,, ,,	,, ,,	,,
	७९	अश्वत्थे वो निषदनं०	,,	,, ,, ,,	,, ,,	,,
	८०	यत्रौषधीः समग्मत०	,,	,, ,, ,,	,, ,,	,,
	८१	अश्वावतीꣳ सोमावती०	,,	,, ,, ,,	,, ,,	,,
	८२	उच्छुष्मा ओषधीनाꣳ	,,	,, ,, ,,	,, ,,	,,

दशानारभ्याधीता, मा मा हिरण्यगर्भः कार्यीं त्रिष्टुभमभ्यावर्तस्वोष्णिगाग्नेय्यग्ने यद्गायत्रीपं त्रिष्टुवग्ने तव पावकोऽग्निराग्नेयꣳ षड्चं, प्रथमे विष्टारपंक्ती तिस्रः सतोबृहत्य उपरिष्टाज्ज्योतिः पष्ठ्याप्यायस्व गोतमः सौम्यो गायत्रीत्रिष्टुब्नुष्णिह, आ तेऽवत्सारस्तु-

८३	इष्कृतिर्नाम वो माता०	प्रजापतिः	साध्याः	आथर्वणोऽभिषक्	ओषधयः		अनुष्टुप्
८४	अति विश्वाः परिष्ठा०	,,	,,	,,	,,	,,	,,
८५	यदिमा वाजयन्नहं०	,,	,,	,,	,,	,,	,,
८६	यस्यौषधीः प्रसर्पथा०	,,	,,	,,	,,	,,	,,
८७	साकं यक्ष्म प्रपत०	,,	,,	,,	,,	,,	,,
८८	अन्या वोऽअन्या०	,,	,,	,,	,,	,,	,,
८९	याः फलिनीर्या०	,,	,,	,,	,,	,,	,,
[अथ अनारभ्याधीताः मन्त्राः ९०-१०१]							
९०	मुञ्चन्तु मा शपथ्या०	,,	,,	,,	,,	बन्धुः ,,	,,
९१	अवपतन्तीरवदन्०	,,	,,	,,	,,	,, ,,	,,
९२	या ओषधीः सोमराज्ञीर्बह्वीः०	,,	,,	,,	,,	,, ,,	,,
९३	या ओषधीः सोमराज्ञीर्विष्ठिताः०	,,	,,	,,	,,	,, ,,	,,
९४	याश्चेदमुपशृण्वन्ति०	,,	,,	,,	,,	,, ,,	,,
९५	मा वो रिषत्खनिता०	,,	,,	,,	,,	,, ,,	,,
९६	ओषधयः समवदन्त०	,,	,,	,,	,,	,, ,,	,,
९७	नाशयित्री बलासस्या०	,,	,,	,,	,,	,, ,,	,,
९८	त्वां गन्धर्वाऽअखनँस्त्वा०	,,	,,	,,	,,	,, ,,	,,
९९	सहस्व मेऽअरातीः०	,,	,,	,,	,,	,, ,,	,,
१००	दीर्घायुस्तऽओषधे०	,,	,,	,,	,,	,, ,,	,,
१०१	त्वमुत्तमास्योषधे०	,,	,,	,,	,,	,, ,,	,,
[इत्यनारभ्याधीताः मन्त्राः समाप्ताः]							
१०२	मा मा हिꣳसीज्जनिता०	,,	,,	हिरण्यगर्भः	कः		त्रिष्टुप्
१०३	अभ्यावर्तस्व पृथिवि०	,,	,,		अग्निः		उष्णिक्
१०४	अग्ने यत्ते शुक्रं०	,,	,,		,,		गायत्री
१०५	इषमूर्जमहमित०	,,	,,		आशीः		त्रिष्टुप्
१०६	अग्ने तव श्रवो वयो०	,,	,,	पावकोऽग्निः	अग्निः		विष्टारपंक्तिः
१०७	पावकवर्चाः शुक्रवर्चा०	,,	,,	,,	,,		,,
१०८	ऊर्जो नपाज्जातवेदः०	,,	,,	,,	,,		सतोबृहती
१०९	इरज्यन्नग्ने प्रथयस्व०	,,	,,	,,	,,		,,
११०	इष्कर्तारमध्वरस्य प्रचेतसं०	,,	,,	,,	,,		,,
१११	ऋतावानं महिषं विश्वदर्शत०	,,	,,	,,	,,	उपरिष्टाज्ज्योतिः	
११२	आप्यायस्व समेतु ते०	,,	,,	गोतमः	सोमः		गायत्री

भ्यं ता द्वे विरूपास्तिस्रो गायत्र्य आग्नेय्यः ॥ ११ ॥ [य० अ० १२ मं० ७५--११७]

इति० संहितायां द्वादशोऽध्यायः ।

मयि ककुबाग्नेयी, ब्रह्मादित्यदेवत्या त्रिष्टुब्भिरण्यगर्भो हिरण्यगर्भः कार्यी त्रिष्टुभं, द्रप्सो देवश्रवा आदित्यो, नमोऽस्तु सार्प्यं तृचमानुष्टुभं, कृणुष्व पाज्ञ प्रतिसरा राक्षोघ्ना, देवानामार्षछं, सर्वास्त्रिष्टुभ आग्नेयीर्वामदेवश्चापश्यदग्नेष्ट्वा यजुराग्नेयमिन्द्रस्यैन्द्रं, ध्रुवस्त्रिशिरा आग्नेयीं त्रिष्टुभम् ॥ १२ ॥ [य० अ० १३ मं० १–१५]

ध्रुवास्यूर्ध्ववृहती, प्रजापतिरनुष्टुब्भूरसि प्रस्तारपंक्तिरासाछं स्वयमातृण्णा देवता विश्वस्मा इत्येतस्य च यजुषः, काण्डात्काण्डादानुष्टुभं द्व्यृचमग्निना दृष्टं दूर्वेष्टकदैवतं,

११३	सं ते पयाꣳसि समु यन्तु०	प्रजापतिः साध्याः गोतमः	सोमः	त्रिष्टुप्
११४	आप्यायस्व मदिन्तम०	,, ,, ,,	,,	उष्णिक्
११५	आ ते वत्सो मनो०	,, ,, अवत्सारः	अग्निः	गायत्री
११६	तुभ्यं ताऽअङ्गिरस्तम०	,, ,, विरूपः	,,	,,
११७	अग्निः प्रियेषु धामसु०	,, ,, ,,	,,	,,

अथ० संहितायां त्रयोदशोऽध्यायः ।

१	मयि गृह्णाम्यग्रेऽअग्निꣳ०	प्रजापतिः साध्याः	अग्निः	ककुप्
[अ.११ मं२९]२	अपां पृष्ठमसि०	,, ,,	पुष्करपर्ण	स्वराट्पंक्तिः
३	ब्रह्म जज्ञानं प्रथमं पुरस्तात्०	,, ,,	आदित्यः	त्रिष्टुप्
४	हिरण्यगर्भः समवर्तताग्रे०	,, ,, हिरण्यगर्भः	कः	,,
५	द्रप्सश्चस्कन्द पृथिवी०	,, ,, देवश्रवाः	आदित्यः	,,
६	नमोऽस्तु सर्पेभ्यो०	,, ,,	सर्पाः	अनुष्टुप्
७	याऽइषवो यातुधानानां०	,, ,,	,,	,,
८	ये वामी रोचने दिवो०	,, ,,	,,	,,
[राक्षोघ्नाः प्रतिसराः । मं. ९–१३]				
९–१३	कृणुष्व० ॥ ९ ॥–ऊर्ध्वो भव० ॥१३॥	,, ,, देवाः, वामदेवः	अग्निः	त्रिष्टुप्
[अ.३।१२] १४	अग्निर्मूर्धा दिवः ककुत्पतिः०	,, ,, विरूपः	,,	गायत्री
	इन्द्रस्य त्वौजसा सादयामि ।	,, ,,	इन्द्रः	
१५	भुवो यज्ञस्य रजसश्च नेता०	,, ,, त्रिशिराः	अग्निः	त्रिष्टुप्
१६	ध्रुवासि धरुणास्तृता०	,, ,,	स्वयमातृण्णा	ऊर्ध्ववृहती
१७	प्रजापतिष्ट्वा सादयत्वपां०	,, ,,	,,	अनुष्टुप्
१८	भूरसि भूमिरस्यदिति०	,, ,,	,,	प्रस्तारपंक्तिः
१९	विश्वस्मै प्राणायापानाय०	,, ,,	,,	
२०	काण्डात्काण्डात्प्ररोहन्ती०	,, ,, अग्निः	दूर्वेष्टका	अनुष्टुप्
२१	या शतेन प्रतनोषि०	,, ,, ,,	,,	,,

यास्त आग्नेयं द्व्यृचमानुष्टुभमिन्द्राग्निभ्यां दृष्टं, विराडयं लोकः, स्वराडसौ लोकः, प्रजापतिष्ट्वा वैश्वज्योतिषं, मधुश्चर्तुदैवतमषाढासि सवितापश्यद्देवा वाऽपश्यन्निष्टका-दैवतम् ॥ १३ ॥ [य० अ० १३ मं० १६-२६]

मधुवाता वैश्वदेवं तृचं गायत्रं गोतमोऽपां गम्भन्पंक्तिस्त्रीन्त्समुद्रांस्त्रिष्टुप् कौर्म्यं द्व्यृचं, ध्रुवासि त्रिष्टुबिषे बृहत्यौषं द्व्यृचमग्ने युक्ष्वाग्नेयं द्व्यृचं गायत्रमाद्यायां भरद्वाजो द्वितीयस्यां विरूपः, सम्यक् त्रिष्टुब् लिङ्गोक्तदेवतर्चे त्वा बृहत्यग्निर्ज्योतिषोष्णिगादित्यं गर्भं पञ्चर्चमाग्नेयं त्रैष्टुभमिमं मा पञ्चर्चमाग्नेयं त्रैष्टुभमेव द्वे द्वे चान्ते यजुषी, त्वं यविष्ठोशनाः काव्य आग्नेयीमनिरुक्तां गायत्रीमपां त्वा विंशतिरैष्टकान्ययं पुरः पञ्चाश-

	२२	यास्तेऽअग्ने सूर्ये रुचो०	प्रजापतिः	साध्याः	इन्द्राग्नी अग्निः	अनुष्टुप्
	२३	या वो देवाः सूर्ये रुचो०	,,	,,	,, ,,	,,
	२४	विराड् ज्योतिरधारयत् ।	,,	,,	अयं लोकः	
		स्वराड् ज्योतिरधारयत् ।	,,	,,	असौ लोकः	
		प्रजापतिष्ट्वा सादयन्तु०	,,	,,	विश्वज्योतिः	
	२५	मधुश्च माधवश्च०	,,	,,	ऋतुः	
	२६	अषाढासि सहमाना०	,,	,,सविता देवा वा	इष्टका	
	२७	मधु वाताऽऋतायते०	,,	,, गोतमः	विश्वेदेवाः	गायत्री
	२८	मधु नक्तमुतोषसो०	,,	,, ,,	,,	,,
	२९	मधुमान्नो वनस्पति०	,,	,, ,,	,,	,,
	३०	अपां गम्भन्त्सीद०	,,	,,	कूर्मः(प्रजापतिरादित्यो वा)	पंक्तिः
	३१	त्रीन्त्समुद्रान्त्समसृपत्०	,,	,,	,,	त्रिष्टुप्
[अ.८मं.३२]	३२	मही द्यौः पृथिवी च न०	,,	,, मेधातिथिः	द्यावापृथिवी	गायत्री
[अ.६मं४]	३३	विष्णोः कर्माणि पश्यत०	,,	,, ,,	विष्णुः	,,
	३४	ध्रुवासि धरुणेतो जज्ञे०	,,	,,	उषा (उखा)	त्रिष्टुप्
	३५	इषे राये रमस्व०	,,	,,	,, ,,	बृहती
	३६	अग्ने युक्ष्वा हि ये०	,,	,, भरद्वाजः	अग्निः	गायत्री
	३७	युक्ष्वा हि देवहूतमाँ२ऽ०	,,	,, विरूपः	,,	,,
	३८	सम्यक्स्रवन्ति सरितो न०	,,	,,	लिङ्गोक्ता	त्रिष्टुप्
	३९	ऋचे त्वा रुचे त्वा०	,,	,,	(हिरण्यशकलं)	बृहती
	४०	अग्निर्ज्योतिषा०	,,	,,	,,	उष्णिक्
४१-४५ आदित्यं गर्भं० ॥४१॥-यो अग्नि०॥४५॥			,,	,,	अग्निः	त्रिष्टुप्
[अ.७मं.४२]	४६	चित्रं देवानामुदगादनीकं०	,,	,, कुत्सःआङ्गिरसः	सूर्यः	,,
४७-५१ इमं मा० ॥४७॥-अजो ह्यग्ने०॥५१॥			,,	,,	अग्नि (यजुरन्ता)	,,
	५२	त्वं यविष्ठ दाशुषो०	,,	,, उशनाः काव्यः	,,	अनिरुक्ता गायत्री

त्प्राणभृद्देवत्यानि, लोकं ता इन्द्रं, तिस्रः प्रतीकोक्ता, एवꣳ सर्वत्र ॥१४॥ [य०अ०१३ मं० २७–५८]

इति० संहितायां त्रयोदशोऽध्यायः ।

अथ द्वितीया चितिः– ध्रुवक्षितिः पञ्चाश्विन्यस्तासां प्रथमा विराट् चतस्रस्त्रिष्टुभो यजुरन्ताः शुक्रश्चर्तव्यꣳ सजूः पञ्च विश्वेषां देवानामार्षं ता एव देवताः, प्राणं मे पञ्च वायव्यान्यपः पञ्चापानि, मूर्द्धा वय एकोनविꣳशतिर्लिङ्गोक्तानि ॥१५॥ [य० अ०१४ मं० १–१०]

अथ तृतीयेन्द्राग्नी अनुष्टुप् पूर्वोऽर्द्धर्च ऐन्द्राग्न उत्तरः स्वयमातृण्णादेवतो, विश्वकर्मा वायव्यꣳ, राज्ञ्यसि पञ्च दिग्देवत्यानि, विश्वकर्मा वायव्यं, नभश्चेषश्चर्तव्ये, आयुर्मे दश लिङ्गोक्तदेवतानि, मा छन्दश्च षट्त्रिꣳशन्मूर्धानुष्टुब्, यन्त्री परोष्णिक् चतुर्दश यजूꣳषि

५३	अपां त्वेमन्त्सादयाम्यपां०	प्रजापतिः साध्याः		इष्टकाः(अपस्याः)
	गायत्रेण त्वा छन्दसा०	,, ,,		,, (छन्दस्याः)
५४–५८	अयं पुरो० ॥५४॥—इयमुपरि०॥५८॥	,, ,,		प्राणभृतः(इष्टकाः)

अथ० संहितायां चतुर्दशोऽध्यायः ।

[अथ द्वितीया चितिः । मंत्र १—१०]

१	ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि०	प्रजापतिः,	साध्याः,	देवाः,	अश्विनौ	विराट्
२–५	कुलायिनी०॥२॥–अदित्यास्त्वा० ॥ ५ ॥	,,	,,	,,	,,	त्रिष्टुप् (यजुरन्ता)
६	शुक्रश्च शुचिश्च०	,,	,,	,,	ऋतुः	
७	सजूर्ऋतुभिः सजूर्विधाभिः०	,,	,,	,, विश्वेदेवाः	विश्वेदेवाः	
८	प्राणं मे पाह्यपानं मे०	,,	,,	,,	वायुः	
	अपः पिन्वौषधीर्जिन्व०	,,	,,	,,	आपः	
९	मूर्धा वयः प्रजापतिश्छन्दः०	,,	,,	,,	लिङ्गोक्ताः	
१०	अनड्वान्वयः पंक्तिश्छन्दो०	,,	,,	,,	,,	

[अथ तृतीया चितिः मं० ११—२२]

११	इन्द्राग्नीऽअव्यथमाना०	,,	,, इन्द्राग्नी,	विश्वकर्मा	इन्द्राग्नी	अनुष्टुप्
	पृष्टेन द्यावापृथिवी०	,,	,,	,,	,,	स्वयमातृण्णा
१२	विश्वकर्मा त्वा सादयतु०	,,	,,	,,	,,	वायुः
१३	राज्ञ्यसि प्राची दिक्०	,,	,,	,,	,,	दिशः
१४	विश्वकर्मा त्वा सादय०	,,	,,	,,	,,	वायुः
१५	नभश्च नभस्यश्च०	,,	,,	,,	,,	ऋतवः
१६	इषश्चोर्जश्च शारदा०	,,	,,	,,	,,	,,

प्राणदेवत्यानि ॥ १६ ॥ [य० अ० १४ मं० ११-२२]

अथ चतुर्थ्याशुरष्टादशाग्नेर्दशैकया सप्तदश सर्वाणि लिङ्गोक्तदेवतानि, सहश्चर्तव्यम् ॥ १७ ॥ [य० अ० १४ मं० २३-३१]

इति० संहितायां चतुर्दशोऽध्यायः ।

अथ पञ्चम्यग्ने जातानाग्नेय्यौ त्रिष्टुभौ, षोडशी चतुश्चत्वारिंशो लिङ्गोक्ते, अग्ने स्त्रिष्टुबेवश्चत्वारिंशद्रश्मिनैकोनत्रिंशद्राज्ञयसि पञ्चायं पुरः पञ्चैतानि सर्वाणि लिङ्गोक्तदेवतानि ॥ १८ ॥ [य० अ० १५ मं० १-१९]

अग्निर्मूर्धाग्नेयोऽनुवाकः, प्रथमस्तृचो गायत्रो, द्वितीयस्त्रैष्टुभो ध्रुवस्तृतीयो जागतोऽ-

१७-२० आयुर्मे ०॥१७॥-अग्निर्देवता०॥२०॥	प्रजापतिः साध्याः इन्द्राग्नी विश्वकर्मा लिङ्गोक्ताः						
२१	मूर्धासि राड् ध्रुवासि०	,,	,,	,,	,,	प्राणः	अनुष्टुप्
२२	यन्त्री राड् यन्त्र्यसि०	,,	,,	,,	,,	,,	परोष्णिक्
[अथ० चतुर्थी चितिः । मं० २३-३१]							
२३	आशुस्त्रिवृद्भान्तः०	,,	,,	ऋषयः	लिङ्गोक्ताः	(त्रिवृदायः)	
२४	अग्नेर्भागोऽसि०	,,	,,	,,	,,	(इष्टकाः)	
२५	वसूनां भागोऽसि०	,,	,,	,,	,,	,,	
२६	यवानां भागोऽसि०	,,	,,	,,	,,	,,	
२७	सहश्च सहस्यश्च०	,,	,,	,,	ऋतवः		
२८-३१ एकया० ॥२८॥-नवविंशं०॥३१॥	,,	,,	,,	लिङ्गोक्ता			

अथ० संहितायां पञ्चदशोऽध्यायः ।

[अथ पञ्चमी चितिः ।]							
१	अग्ने जातान्प्रणुदा नः०	प्रजापतिः,	साध्याः,	परमेष्ठी		अग्निः	त्रिष्टुप्
२	सहसा जातान्प्रणुदा नः	,,	,,	,,		,,	,,
३	षोडशी स्तोम० चतुश्चत्वा०	,,	,,	,,	लिङ्गोक्ताः	(इष्टकाः)	
	अग्नेः पुरीषमस्यप्सो०	,,	,,	,,		,,	त्रिष्टुप्
४-१९ एवच्छन्दो ०॥४॥-अयमुपर्य०॥१९॥	,,	,,	,,		,,		
[अ.३ मं.१२] २०	अग्निर्मूर्धा दिवः ककुत्पतिः	,,	,,	,,		अग्निः	गायत्री
२१	अयमग्निः सहस्रिणो०	,,	,,	,,	विरूपः	,,	,,
[अ.११।३२] २२	त्वामग्ने पुष्करादध्यथर्वा०	,,	,,	,,		,,	,,
[अ.१३।१५] २३	भुवो यज्ञस्य रजसश्च नेता०	,,	,,	,,		,,	त्रिष्टुप्
२४	अबोध्यग्निः समिधा०	,,	,,	,,	बुधगविष्ठिरौ	,,	,,
२५	अवोचाम कवये मेध्याय०	,,	,,	,,		,,	,,
[अ.३ मं.१५] २६	अयमिह प्रथमो धायि०	,,	,,	,,		,,	जगती
२७	जनस्य गोपा अजनिष्ट०	,,	,,	,,	सुतंभरः	,,	,,

यमिह, चतुर्थ आनुष्टुभः सखायः सं, पञ्चमः प्रगाथ एना वस्तत्र पूर्वा बृहती सतोबृहत्युत्तरा, ताभ्यां तिस्रो बृहत्यः सम्पादिताः, षष्ठ औष्णिहोऽग्ने वाजस्य, सप्तमः पुनः काकुभः प्रगाथो भद्रो नस्तत्र पूर्वा ककुप् सतोबृहत्युत्तरा, ताभ्यां तिस्रः ककुभः संपादिता, अष्टमः पांक्तोऽग्निं तं, पदपांक्तो नवमोऽग्ने तमग्निꣳ होतारमतिच्छन्दास्त्र्यवसानाग्ने त्वं द्वैपदस्तृचः ॥ १९ ॥ [य० अ० १५ मं० २०–५१]

अयमग्निर्विरूपोऽबोधि बुधगविष्ठिरौ, जनस्य सुतंभरः, सखाय इषः, सꣳसमित् संवननस्त्वां प्रस्कण्व, एना वो वसिष्ठोऽग्ने वाजस्य गोतमो, भद्रो नः सौभरिरग्निं तं कुमारवृषौ, येनाष्टावाग्नेय्यः षट् त्रिष्टुभो द्वे अनुष्टुभौ, तपश्चर्तव्यं, परमेष्ठी सौरं, प्रोथ-

२८	त्वामग्नेऽअङ्गिरसो गुहा०	प्रजापतिः	साध्याः	परमेष्ठी	अग्निः		जगती
२९	सखायः सं वः सम्यञ्च०	,,	,,	,, इषः	,,		अनुष्टुप्
३०	सꣳसमिद्युसे वृषन्०	,,	,,	,, संवननः	,,		,,
३१	त्वां चित्रश्रवस्तम०	,,	,,	,, प्रस्कण्वः	,,		,,
३२	एना वो अग्निं नमसो०	,,	,,	,, वसिष्ठः	,,		प्रगाथः
३३	विश्वस्य दूतममृतं०	,,	,,	,,	,,		,,
३४	स दुद्रवत्स्वाहुतः०	,,	,,	,,	,,		,,
३५	अग्ने वाजस्य गोमत०	,,	,,	,, गोतमः	,,		उष्णिक्
३६	स ईधानो वसुष्कवि०	,,	,,	,,	,,		,,
३७	क्षपो राजन्नुत त्मना०	,,	,,	,,	,,		,,
३८	भद्रो नो अग्निराहुतो०	,,	,,	,, सौभरिः	,,	काकुभः	प्रगाथः
३९	भद्रा उत प्रशस्तयो०	,,	,,	,,	,,	,,	,,
४०	येना समत्सु सासहो०	,,	,,	,,	,,	,,	,,
४१	अग्निं तं मन्ये यो वसु०	,,	,,	,, कुमारवृषौ	,,		पंक्तिः
४२	सोऽअग्निर्यो वसुर्गृणे०	,,	,,	,,	,,		,,
४३	उभे सुश्चन्द्र सर्पिषो०	,,	,,	,,	,,		,,
४४	अग्ने तमद्याश्वं न०	,,	,,	,,	,,		पदपंक्तिः
४५	अधा ह्यग्ने क्रतो०	,,	,,	,,	,,		,,
४६	एभिर्नोऽअर्कैर्भवा०	,,	,,	,,	,,		,,
४७	अग्निꣳ होतारं मन्ये०	,,	,,	,,	अग्निः		अतिच्छन्दाः
							व्यवसाना
[अ.३।२५-२६] ४८	अग्ने त्वं नोऽअन्तम०	,,	,,	,, बन्ध्वादयः	,,		द्विपदा विराट्
४९–५४	येन ऋषय०॥४९–उद्बुध्यस्व०॥५४॥	,,	,,	,,	,,		त्रिष्टुप्
५५	येन वहसि सहस्रं०	,,	,,	,,	,,		अनुष्टुप्
५६	अयं ते योनिर्ऋत्वियो०	,,	,,	,,	,,		,,

दश्चो वसिष्ठस्त्रिष्टुभमाग्नेयीमायोर्द्वे स्वयमातृण्णदेवते, सहस्रस्य पञ्चाग्नेयानि ॥ २० ॥ [य० अ० १५ मं० २१-६५]

इति० संहितायां पञ्चदशोऽध्यायः ।

रौद्रोऽध्यायः-- परमेष्ठिन आर्षं देवानां वा प्रजापतेर्वाद्योऽनुवाकः षोडशर्चं एकरुद्रदेवत्यः, प्रथमा गायत्री तिस्रोऽनुष्टुभस्तिस्रः पंक्तयः, सप्तानुष्टुभो, द्वे जगत्यौ, मा नो द्वे कुत्सः ॥ २१ ॥ [य० अ० १६ मं० १--१६]

अन्त्यानुवाके सप्तैकरुद्रस्तुतिराद्योपरिष्टाद्बृहती, द्वितीया जगती कुत्सस्य, तृतीया

	५७	तपश्च तपस्यश्च०	प्रजापतेः	साध्याः	परमेष्ठी	ऋतवः	
	५८	परमेष्ठी त्वा सादयतु०	,,	,,	,,	सूर्यः	
[अ.१२।५४]	५९	लोकं पृण छिद्रं पृण०	,,	,,	,,	लिङ्गोक्ता(लोकंपृणा)	अनुष्टुप्
[अ.१२।५५]	६०	ताऽअस्य सूददोहसः०	,,	,,	,, प्रियमेधः ऐन्द्रः	आपः	,,
[अ.१२ मं.५६]	६१	इन्द्रं विश्वाऽअवीवृधन्०	,,	,,	,, जेता माधुच्छंदसः	इन्द्रः	,,
	६२	प्रोथदश्वो न यवसे०	,,	,,	,, वसिष्ठः	अग्निः	त्रिष्टुप्
	६३	आयोष्ट्वा सदने सादयामि०	,,	,,	,,	स्वयमातृण्णा	
	६४	परमेष्ठी त्वा सादयतु०	,,	,,	,,	,,	
	६५	सहस्रस्य प्रमासि०	,,	,,	,,	अग्निः	

अथ० संहितायां षोडशोऽध्यायः ।

[रौद्रोऽध्यायः ।]

	१	नमस्ते रुद्र मन्यव०	परमेष्ठी	देवाः	प्रजापतिः वा	एकरुद्रः	गायत्री
	२	या ते रुद्र शिवा तनू०	,,	,,	,,	,,	अनुष्टुप्
	३	यामिषुं गिरिशन्त हस्ते०	,,	,,	,,	,,	,,
	४	शिवेन वचसा त्वा०	,,	,,	,,	,,	,,
	५	अध्यवोचदधिवक्ता०	,,	,,	,,	,,	पंक्तिः
	६	असौ यस्ताम्रोऽअरुण०	,,	,,	,,	,,	,,
	७	असौ योऽवसर्पति०	,,	,,	,,	,,	,,
८-१४		नमोऽस्तु०॥८॥-नमस्त आयु०॥१४॥	,,	,,	,,	,,	अनुष्टुप्
	१५	मा नो महान्तमुत०	,,	,,	,, कुत्सः	,,	जगती
	१६	मा नस्तोके तनये०	,,	,,	,, ,,	,,	,,
१७-४६		नमो हिर०॥१७॥-नमः पर्णाय०॥४६॥	,,	,,	,,	बहुरुद्राः	,,
		नमो वः किरिकेभ्यो०	,,	,,	,,	अग्निवायुसूर्याः	
	४७	द्रापे अन्धसस्पते दरिद्रं०	,,	,,	,,	एकरुद्रः	उपरिष्टाद्बृहती

नुष्टुब्, द्वे त्रिष्टुभौ, द्वे अनुष्टुभावसंख्याता बहुरुद्रदेवत्या, दशानुष्टुभो मन्त्रा अवतानसंज्ञकास्ततोऽन्त्यानि त्रीणि यजूंष्यपि बहुरुद्रदेवत्यानि प्रत्यवरोहसंज्ञका मन्त्राः ॥ २२ ॥

मध्ये सर्वाणि यजूंष्यपि, हिरण्यबाहव इति तिस्रोऽशीतयो रुद्राणां, तेषामुभयतो नमस्कारा अन्ये, अन्यतरतोनमस्कारा अपरे, जाता नाम रुद्राः सभाभ्य इत्यादयो, नमो वः किरिकेभ्य इत्यग्निवायुसूर्यहृदयभूताः पञ्च व्याहृतयो बहुरुद्रदेवत्याः ॥ २३ ॥ [य० अ० १६ मं० १७--६६]

इति० संहितायां षोडशोऽध्यायः ।

अश्मन्मारुतमश्मँस्तेऽश्मा, मय्याशीर्यं द्विष्म आभिचारिकमिमा म आग्नेयमृतवो बृहती पंक्तिर्वा, समुद्रस्य द्वे गायत्र्यावुपज्मन् जगती त्रिष्टुब् वापामिदं बृहत्यग्ने पावक वसूयवः, स नो मेधातिथिरेते आग्नेय्यौ गायत्र्यौ, पावकया जगतीं भरद्वाजो, नमस्ते

४८	इमा रुद्राय तवसे	परमेष्ठी	देवाः	प्रजापतिः वा,	कुत्सः	एकरुद्रः जगती
४९	या ते रुद्र शिवा तनूः०	,,	,,	,,	,,	अनुष्टुप्
५०	परि नो रुद्रस्य हेति०	,,	,,	,,	,,	त्रिष्टुप्
५१	मीढुष्टम शिवतम०	,,	,,	,,	,,	,,
५२	विकिरिद्र विलोहित०	,,	,,	,,	,,	अनुष्टुप्
५३	सहस्राणि सहस्रशो०	,,	,,	,,	,,	,,
[अवतानसंज्ञका मन्त्राः । अ० १६ मं ५४-६३]						
५४-६३	असंख्याता०॥५४॥-य एताव०॥६३॥	,,	,,	,,	बहुरुद्राः	,,
[प्रत्यवरोहसंज्ञका मंत्राः । अ० १६ मं० ६४-६६]						
६४-६६	नमोऽस्तु० ॥६४॥-नमोऽस्तु०॥६६॥	,,	,,	,,	,,	,,

अथ० संहितायां सप्तदशोऽध्यायः ।

१	अश्मन्नूर्जं पर्वते०	प्रजापतिः,	साध्याः	मरुतः	,,
	अश्मँस्ते क्षुत् ।	,,	,,	अश्मा	
	मयि त ऊर्क् ।	,,	,,	आशीः	
	यं द्विष्मस्तं ते शुगृच्छतु ।	,,	,,	(शुक्)	
२	इमा मेऽअग्न इष्टका०	,,	,,	अग्निः	
३	ऋतवः स्थ ऋतावृध०	,,	,,	,,	बृहती पंक्तिर्वा
४	समुद्रस्य त्वावकयाग्ने०	,,	,,	अग्निः	गायत्री
५	हिमस्य त्वा जरायुणाऽग्ने०	,,	,,	,,	,,
६	उप ज्मन्नुप वेतसे०	,,	,,	,,	जगती त्रिष्टुप् वा
७	अपामिदं न्ययनꣳ०	,,	,,	,,	बृहती
८	अग्ने पावक रोचिषा०	,,	,, वसूयवः	,,	गायत्री

बृहतीमाग्नेयीमृषिसुता लोपामुद्रा ॥ २४ ॥ [य० अ० १७ मं० १--११]

नृषदे पञ्चाग्नेयानि, ये देवा जगत्यौ प्राणदेवत्ये, प्राणदा बृहती पंक्तिर्वाग्नेय्यग्निस्तिग्मेनाग्नेयीं गायत्रीं भरद्वाजो, य इमा वैश्वकर्मणीस्त्रिष्टुभो विश्वकर्मा भौवनः ॥ २५ ॥ [य० अ० १७ मं० १२--३२]

आशुरैन्द्रीर्द्वादश त्रिष्टुभोऽप्रतिरथोऽवसृष्टानुष्टुविषुदेवत्या प्रेत योद्धृंस्तौत्यनुष्टुवसौ या मारुती, त्रिष्टुब्यत्र लिङ्गोक्तदेवता पंक्तिर्मर्माणि लिङ्गोक्तैव त्रिष्टुबुदेनं तिस्रोऽनुष्टुभ आद्याग्नेयी, द्वितीयैन्द्री, तृतीया लिङ्गोक्तदेवता, पञ्च दिशः पञ्चयज्ञाग्निसाधनवादिन्य आद्ये द्वे त्रिष्टुभौ, तृतीया पंक्तिर्बृहती वा, चतुर्थी बृहत्येवान्त्या त्रिष्टुब् विमानो

९	स नः पावक दीदिवो०	प्रजापतिः	साध्याः मेधातिथिः	अग्निः	गायत्री
१०	पावकया यश्चितयन्त्या०	,,	,, भरद्वाजः	,,	जगती
११	नमस्ते हरसे शोचिषे०	,,	,, ऋषिसुता लोपामुद्रा	,,	बृहती
१२	नृषदे वेडप्सुषदे०	,,	,,	,,	
१३	ये देवा देवानां०	,,	,,	प्राणाः	जगती
१४	ये देवा देवेष्वधि०	,,	,,	,,	,,
१५	प्राणदा अपानदा०	,,	,,	अग्निः	बृहती पंक्तिर्वा
१६	अग्निस्तिग्मेन शोचिषा०	,,	,, भरद्वाजः	,,	गायत्री
१७-३२	यऽइमा०॥१७॥-विश्वकर्मा०॥३२॥	,,	,, विश्वकर्मा भौवनः	विश्वकर्मा	त्रिष्टुप्
३३-४४	आशुःशिशानो०॥३३-अमीषां०॥४४॥	,,	,, अप्रतिरथः	इन्द्रः	,,
४५	अवसृष्टा परातप०	,,	,,	इषुः	अनुष्टुप्
४६	प्रेता जयता नर इन्द्रो०	,,	,,	योद्धारः	,,
४७	असौ या सेना मरुतः०	,,	,,	मरुतः	त्रिष्टुप्
४८	यत्र बाणाः सम्पतन्ति०	,,	,,	लिङ्गोक्ता (इन्द्रादयः)	पंक्तिः
४९	मर्माणि ते वर्मणा छाद०	,,	,,	,, (क्षत्रियः)	त्रिष्टुप्
५०	उदेनमुत्तरां नयाग्ने०	,,	,,	अग्निः	अनुष्टुप्
५१	इन्द्रेमं प्रतरां नय०	,,	,,	इन्द्रः	,,
५२	यस्य कुर्मो गृहे हवि०	,,	,,	लिङ्गोक्ता	,,
[अ.१२ मं.३१] ५३	उदु त्वा विश्वे देवा०	,,	,, तापसः	अग्निः	,,
५४	पञ्च दिशो दैवीर्यज्ञमवन्तु०	,,	,,	(दिशः)	त्रिष्टुप्
५५	समिद्धेऽअग्नावधि मामहान०	,,	,,	(अग्नि)	,,
५६	दैव्याय धर्त्रे जोष्ट्रे०	,,	,,	,,	पंक्तिः बृहती वा
५७	वीतꣳ हविः शमितꣳ०	,,	,,	(हविर्यज्ञः)	बृहती
५८	सूर्यरश्मिर्हरिकेशः पुरस्तात्०	,,	,,	(अग्निः)	त्रिष्टुप्
५९	विमान एष दिवो०	,,	,, विश्वावसुः	आदित्यः	,,

द्वे आदित्यदेवत्ये, आद्या विश्वावसोर्द्वितीयाप्रतिरथस्य, देवहूर्विधृतिरनुष्टुब् यज्ञदेवत्या, वाजस्यैन्द्यनुष्टुबुद्भाभमैन्द्राग्न्यनुष्टुबेव ॥ २६ ॥ [य० अ० १७ मं० ३३–६४]

क्रमध्वं पञ्चाग्नेरग्य आद्यानुष्टुप्, ततस्त्रिष्टुप्, ततो बृहती पिपीलिकमध्या, ततोऽनुष्टुप्, त्रिष्टुबन्त्याग्ने सहस्राक्ष विराडाग्नेयी, सुपर्णो द्वे पंक्तित्रिष्टुभौ, ताꣳ सवितुः सावित्रीं त्रिष्टुभं [पुरस्ताज्ज्योतिषं] कण्वो ददर्श, विधेमाग्नेयीं गृत्समदस्त्रिष्टुभमस्यास्त्रिस्थानोऽग्निर्देवता, प्रेद्धो विराडाग्नेयी वसिष्ठस्य, चित्तिं वैश्वकर्मण्यतिजगती, सप्त त आग्नेयी त्रिष्टुप्सप्तऋषीणाम् ॥ २७ ॥ [य० अ० १७ मं० ६५–७९]

शुक्रज्योतिः षण्मारुत्य आद्या चतुर्थी चोष्णिग्द्वितीया तृतीया च गायत्री, पञ्चमी

	६०	उक्षा समुद्रोऽअरुणः०	प्रजापतिः,	साध्याः अप्रतिरथः	आदित्यः	त्रिष्टुप्
[अ.१२।५६]	६१	इन्द्रं विश्वाऽअवीवृधन्०	,,	,, जेता माधुच्छन्दसः	इन्द्रः	अनुष्टुप्
	६२	देवहूर्यज्ञ आ च वक्षत्०	,,	,, विधृतिः	यज्ञः	,,
	६३	वाजस्य मा प्रसव०	,,	,,	इन्द्रः	,,
	६४	उद्भ्राभं च निग्राभं च०	,,	,,	इन्द्राग्नी	,,
	६५	क्रमध्वमग्निना नाक०	,,	,,	अग्निः	,,
	६६	प्राचीमनु प्रदिशं प्रेहि०	,,	,,	,,	त्रिष्टुप्
	६७	पृथिव्याऽअहमुदन्तरिक्ष०	,,	,,	,,	बृहती पिपीलिकमध्या
	६८	स्वर्यन्तो नापेक्षन्त०	,,	,,	,,	अनुष्टुप्
	६९	अग्ने प्रेहि प्रथमो०	,,	,,	,,	त्रिष्टुप्
[अ.१२ मं.२]	७०	नक्तोषासा समनसा०	,,	,, कुत्सः	अग्निः	,,
	७१	अग्ने सहस्राक्ष शतमूर्ध०	,,	,,	,,	विराट्
	७२	सुपर्णोऽसि गुरुत्मान्०	,,	,,	,,	पंक्तिः
	७३	आजुह्वानः सुप्रतीकः०	,,	,,	,,	त्रिष्टुप्
	७४	ताꣳ सवितुर्वरेण्यस्य०	,,	,, कण्वः	सविता	,,
	७५	विधेम ते परमे जन्मन्नग्ने०	,,	,, गृत्समदः	त्रिस्थानोऽग्निः	,,
	७६	प्रेद्धोऽअग्ने दीदिहि०	,,	,, वसिष्ठः	अग्निः	विराट्
[अ.१५।४४]	७७	अग्ने तमद्याश्वं न स्तोमैः०	,,	,,	,,	पदपंक्तिः
	७८	चित्तिं जुहोमि मनसा०	,,	,,	विश्वकर्मा	अतिजगती
	७९	सप्त ते अग्ने समिधः सप्त०	,,	,, सप्त ऋषयः	अग्निः	त्रिष्टुप्
	८०	शुक्रज्योतिश्च चित्रज्योतिश्च०	,,	,,	मरुतः	उष्णिक्
	८१	ईदृङ् चान्यादृङ् च०	,,	,,	,,	गायत्री
	८२	ऋतश्च सत्यश्च०	,,	,,	,,	,,
	८३	ऋतजिच्च सत्यजिच्च०	,,	,,	,,	उष्णिक्
	८४	ईदृक्षास एतादृक्षास०	,,	,,	,,	जगती

जगती, षष्ठी गायत्र्युष्णिग्वेन्द्रं दैवीर्मारुतमिमं त्रयोदशर्चं आग्नेयस्त्रैष्टुभोऽनुवाको यज्ञस्तुतिर्घृतस्तुतिर्वा वसोर्धाराभिवादिनी वा, घृतं मिमिक्षे गृत्समदः, समुद्राद्वामदेवश्चत्वारि शृङ्गा यज्ञपुरुषदेवत्य ऋषभो मन्त्रः ॥ २८ ॥ [य० अ० १७ मं० ६५--९९]

इति० संहितायां सप्तदशोऽध्यायः ।

वाजश्च मे देवानामार्षमेतैर्यजुर्भिर्यजमानोऽग्नेः कामान्याचते, वाजप्रसवीयꣳ सप्तर्चं विश्वे त्रैष्टुभं वैश्वदेवं लुशोधानाको, वाजो नस्तिस्रोऽन्नदेवत्या आद्यानुष्टुब्द्वे त्रिष्टुभौ, सं मा विराजावाग्नेय्यौ, सरस्वत्यै लिङ्गोक्तदेवतम् ॥२९॥ [य० अ० १८ मं० १--३७]

ऋतापाङ्गन्धर्वाप्सरसः, स नः प्राजापत्या प्रस्तारपंक्तिः, समुद्रोऽसि वायव्यानि

	८५	स्वतवाँश्च प्रधासी च०	प्रजापतिः	साध्याः	मरुतः	गायत्री उष्णिग्वा
	८६	इन्द्रं दैवीर्विशो मरुतो०	,,	,,	,,	
	८७	इमꣳ स्तनमूर्जस्वन्तं०	,,	,,	अग्निः	त्रिष्टुप्
	८८	घृतं मिमिक्षे घृतमस्य०	,,	,, गृत्समदः	,,	,,
	८९	समुद्रादूर्मिर्मधुमाँ०	,,	,, वामदेवः	,,	,,
	९०	वयं नाम प्रब्रवामा०	,,	,,	,,	,,
	९१	चत्वारि शृङ्गा त्रयोऽअस्य०	,,	,,	,, यज्ञपुरुषः	,,
९२-९९		त्रिधा हितं०॥९२-धामं ते०॥९९	,,	,,	,,	,,

अथ० संहितायां अष्टादशोऽध्यायः।

१-२९		वाजश्च मे०॥१-आयुर्यज्ञेन०॥ २९ ॥	प्रजापतिः	साध्याः	देवाः	,,
		[अथ वाजप्रसवीयम् ३०—३६]				
[अ.९ मं.५]	३०	वाजस्य नु प्रसवे मातरं०	,,	,,	पृथिवी	अतिजगती
	३१	विश्वेऽअद्य मरुतो विश्व०	,,	,, लुशोधानाकः	विश्वेदेवाः	त्रिष्टुप्
	३२	वाजो नः सप्त प्रदिश०	,,	,,	अन्नम्	अनुष्टुप्
	३३	वाजो नो अद्य प्रसुवाति०	,,	,,	,,	त्रिष्टुप्
	३४	वाजः पुरस्तादुत मध्यतो०	,,	,,	,,	,,
	३५	सं मा सृजामि पयसा	,,	,,	अग्निः	विराट्
	३६	पयः पृथिव्यां पय०	,,	,,	,,	,,
[अ.१मं.१०]	३७	देवस्य त्वा सवितुः०	,,	,,	सविता	
		सरस्वत्यै वाचो यन्तु०	,,	,,	लिङ्गोक्ता (यजमानः)	
	३८	ऋतापाड्ऋतधामाग्निर्गन्धर्व०	,,	,,	गंधर्वः	
		तस्यौषधयोऽप्सरसो०	,,	,,	अप्सरसः	
	३९	सꣳहितो विश्वसामा०	,,	,,	गन्धर्वः	
		तस्य मरीचयोऽप्सरस०	,,	,,	अप्सरसः	
	४०	सुषुम्णः सूर्यरश्मिश्चन्द्रमा०	,,	,,	गन्धर्वः	

त्रीणि, रुचमाग्नेय्यनुष्टुप्, तत्त्वा वारुणी त्रिष्टुभश्छं शुनःशेपः, स्वर्णाग्नेयानि पञ्चाग्निं युनज्म्याग्नेय्यास्तिस्र आद्ये द्वे त्रिष्टुभौ पंक्तिस्तृतीया, दिवो द्वे आग्नेय्यौ परोष्णिङ्महापदपंक्ती, इष्टो यज्ञो द्व्यृचं यजमानाग्निदेवत्यं गालव, आद्योष्णिग्द्वितीया गायत्री ॥ ३०॥

[य० अ० १८ मं० ३८--५७]

यदाकूतादष्टर्चमाग्नेयं, विश्वकर्मणस्तृतीया दैवी वाद्या जगती तिस्रस्त्रिष्टुभश्चतस्रोऽनुष्टुभोऽग्निरस्म्यग्न्यद्वैतवादिनीं त्रिष्टुभं देवश्रवा देववातश्च भारतावृचो यजुर्ये अग्नयोऽ-

	तस्य नक्षत्राण्यप्सरसो०	प्रजापतिः	साध्याः	अप्सरसः		
४१	इषिरो विश्वव्यचा वातो०	,,	,,	गन्धर्वः		
	तस्यापोऽप्सरसऽऊर्जो०	,,	,,	अप्सरसः		
४२	भुज्युः सुपर्णो यज्ञो गंधर्व०	,,	,,	गन्धर्वः		
	तस्य दक्षिणा अप्सरस०	,,	,,	अप्सरसः		
४३	प्रजापतिर्विश्वकर्मा मनो०	,,	,,	गन्धर्वः		
	तस्यऽऋक्सामान्यप्सरसो०	,,	,,	अप्सरसः		
४४	स नो भुवनस्य पते०	,,	,,	प्रजापतिः	प्रस्तारपंक्तिः	
४५	समुद्रोऽसि नभस्वा०	,,	,,	वायुः		
[अ.१३।२२] ४६	यास्तेऽअग्ने सूर्ये रुचो०	,,	,, इन्द्राग्नी	अग्निः	अनुष्टुप्	
[अ.१३।२३] ४७	या वो देवाः सूर्ये रुचो०	,,	,, ,,	,,	,,	
४८	रुचं नो धेहि ब्राह्मणेषु०	,,	,,	अग्निः	,,	
४९	तत्त्वा यामि ब्रह्मणा०	,,	,, शुनःशेपः	वरुणः	त्रिष्टुप्	
५०	स्वर्ण घर्मः स्वाहा०	,,	,,	अग्निः		
५१	अग्निं युनज्मि मनसा०	,,	,,	,,	,,	
५२	इमौ ते पक्षावजरौ०	,,	,,	,,	,,	
५३	इन्दुर्दक्षः श्येनऽऋतावा०	,,	,,	,,	पंक्तिः	
५४	दिवो मूर्धासि पृथिव्या०	,,	,,	,,	परोष्णिक्	
५५	विश्वस्य मूर्धन्नधि तिष्ठसि०	,,	,,	,,	महापदपंक्तिः	
५६	इष्टो यज्ञो भृगुभि०	,,	,, गालवः	यजमानः	उष्णिक्	
५७	इष्टोऽअग्निराहुतः०	,,	,, ,,	अग्निः	गायत्री	
५८	यदाकूतात्समसुस्रोद्धृदो वा	,,	,, विश्वकर्मा	अग्निः	जगती	
५९	एतꣳ सधस्थं परि ते०	,,	,, ,,	,,	त्रिष्टुप्	
६०	एतं जानाथ परमे व्योमन्०	,,	,, ,,	,, देवाः वा	,,	
[अ.१५।५४] ६१	उद्बुध्यस्वाग्ने प्रति०	,,	,, ,,	,,	,,	
[अ.१५।५५] ६२	येन वहसि सहस्रं०	,,	,, ,,	,,	अनुष्टुप्	
६३	प्रस्तरेण परिधिना०	,,	,, ,,	,,	,,	
६४	यद्दत्तं यत्परादानं०	,,	,, ,,	,,	,,	

नुष्टुबाग्नेयी ॥ ३१ ॥ [य० अ० १८ मं० ५८--६७]

वार्त्रहत्याय सप्तर्चमिन्द्रोऽपश्यदाद्ये द्वे वार्त्रघ्न्यौ गायत्रीत्रिष्टुभौ विश्वामित्रस्य च, वि नोऽनुष्टुम्मृगो न त्रिष्टुप्, प्रथमाष्ठं शासो भारद्वाजो, द्वितीयां जय ऐन्द्रो, द्वे वैश्वानर्यौ गायत्रीत्रिष्टुभौ, पृष्टो दिवि कुत्सस्य चाश्याम द्वे त्रिष्टुभावाग्नेय्यौ कामवत्यावश्याम भरद्वाजस्य च, वयं ते कात्यस्योत्कीलस्य च, धामच्छदनुष्टुब्वैश्वदेवी ॥ ३२ ॥ [य० अ० १८ मं० ६८--७७]

इति० संहितायामष्टादशोऽध्यायः ।

अथ सौत्रामणी--प्रजापतेरार्षमश्विनोः सरस्वत्याश्च, स्वाद्वीं त्वानुष्टुप्सुरासोमदेवत्या, सोमोऽसि चत्वारि सौराणि, परीतो भारद्वाजः सौमीं बृहतीं, वायोस्तृचो गायत्रः सोम्य

६५	यत्र धाराऽअनपेता०	प्रजापतिः	साध्याः	विश्वकर्मा	अग्निः	अनुष्टुप्
६६	अग्निरस्मि जन्मना जात०	,,	,,	देवश्रवा देववातश्च भारतौ	,,	त्रिष्टुप्
६७	ऋचो नामास्मि०	,,	,,		(आत्मा)	
	येऽअग्नयः पाञ्चजन्या०	,,	,,		अग्निः	अनुष्टुप्
६८	वार्त्रहत्याय शवसे०	,,	,,	इन्द्रः, विश्वामित्रः	वृत्रहा (इन्द्रः)	गायत्री
६९	सहदानुं पुरुहूत क्षियन्तं०	,,	,,	,, ,,	,, ,,	त्रिष्टुप्
[अ.८।४४] ७०	वि न इन्द्र मृधो जहि०	,,	,,	,, भारद्वाजः शासः	,, ,,	अनुष्टुप्
७१	मृगो न भीमः कुचरो०	,,	,,	,, जयः ऐन्द्रः	,, ,,	त्रिष्टुप्
७२	वैश्वानरो न ऊतय०	,,	,,	,,	वैश्वानरः	गायत्री
७३	पृष्टो दिवि पृष्टोऽअग्निः०	,,	,,	,, कुत्सः	,,	त्रिष्टुप्
७४	अश्याम तं काममग्ने०	,,	,,	,, भरद्वाजः	अग्निः	,,
७५	वयं तेऽअद्य ररिमा०	,,	,,	कात्य उत्कीलः	,,	,,
७६	धामच्छदग्निरिन्द्रो०	,,	,,		विश्वेदेवाः	अनुष्टुप्
[अ.१३।५२] ७७	त्वं यविष्ठ दाशुषो०	,,	,,	उशनाः काव्यः	अग्निः	गायत्री

अथ० संहितायामेकोनविंशोऽध्यायः ।

[अथ सौत्रामणी अ. १९— अ. २१]

१	स्वाद्वीं त्वा स्वादुना०	प्रजापतिः,	अश्विनौ,	सरस्वती,	सुरासोमः	अनुष्टुप्
	सोमोऽस्यश्विभ्यां पच्यस्व०	,,	,,	,,	सूर्यः	
२	परीतो षिञ्चता सुतꣳ०	,,	,,	,, भारद्वाजः	सोमः	बृहती
३	वायोः पूतः पवित्रेण प्रत्य०	,,	,,	,, आभूतिः	,,	गायत्री
	वायोः पूतः पवित्रेण प्राङ्०	,,	,,	,, ,,	,,	,,
४	पुनाति ते परिस्रुतꣳ०	,,	,,	,, ,,	,,	,,

आभूतेर्ब्रह्म क्षत्रं त्रिष्टुप् सुरासोमदेवत्या, नाना हि जगती सुरासोमदेवत्या, तेजोऽसि पयोदेवत्यान्योजोऽसि सुरादेवत्यानि, या व्याघ्रꣳ हैमवर्चैरनुष्टुब् विपूचिकास्तुतिर्यदापिपेषाग्नेयी बृहती, सम्पृच स्थ पयोग्रहा, विपृच स्थ सुराग्रहा, देवा यज्ञं ब्राह्मणानुवाको विꣳशतिरनुष्टुभः सोमसम्पत् ॥ ३३ ॥ [अ० १९ मं० १–३१]

सुरावन्तं चतुर्ऋचं त्रैष्टुभमश्विसरस्वतीन्द्रदेवत्यं, पितृभ्यःसप्त पित्र्याणि, पुनन्तु मा नवर्चं पावमानमाद्ये द्वे पित्र्ये अनुष्टुभौ, प्रजापतिस्तृतीयां वैखानस आग्नेयीं गायत्रीं, चतुर्थी लिङ्गोक्तदेवतानुष्टुप्, पञ्चम्याग्नेयी गायत्री, षष्ठ्याग्नेयीं ब्राह्मी वा गायत्री, ब्राह्मस्तृतीयः पादः, सौमी सप्तमी सावित्र्यष्टमी, नवमी त्रिष्टुब् वैश्वदेवी, ये समाना

	५	ब्रह्म क्षत्रं पवते०	प्रजापतिः	अश्विनौ	सरस्वती	सुरासोमः	त्रिष्टुप्
[अ.१०।३२]	६	कुविदङ्ग यवमन्तो यवं०	,,	,,	,, सुकीर्तिः काक्षीवतः	सोमः	अनिरुक्ता त्रिष्टुप्
	७	नाना हि वां देवहितꣳ०	,,	,,	,,	सुरासोमः	जगती
	८	उपयामगृहीतो०	,,	,,	,,		
	९	तेजोऽसि तेजो मयि०	,,	,,	,,	पयः	
		ओजोऽस्योजो मयि०	,,	,,	,,	सुरा	
	१०	या व्याघ्रं विपूचिकोभौ०	,,	,,	,, हैमवर्चिः	विपूचिका	अनुष्टुप्
	११	यदापिपेष मातरं०	,,	,,	,,	अग्निः	बृहती
		सम्पृच स्थ सं मा०	,,	,,	,,	पयोग्रहाः	
		विपृच स्थ वि मा०	,,	,,	,,	सुराग्रहाः	
[ब्राह्मणानुवाकः— मं० १२—३१]							
१२–३१		देवा यज्ञ० ॥१२– एतावद्रूपं० ॥३१॥	,,	,,	,,	सोमसम्पत्	अनुष्टुप्
[इति ब्राह्मणानुवाकः ।]							
३२–३५		सुरावन्तं० ॥३२॥– यदत्र० ॥३५॥	,,	,,	,,	अश्विसरस्वतीन्द्राः	त्रिष्टुप्
	३६	पितृभ्यः स्वधायिभ्यः०	,,	,,	,,	पितरः	
	३७	पुनन्तु मा पितरः०	,,	,,	,,	,,	अनुष्टुप्
		पुनन्तु मा पितामहाः०	,,	,,	,,	,,	,,
	३८	अग्न आयूꣳषि पवस०	,,	,,	,, प्रजापतिः वैखानसः	अग्निः	गायत्री
	३९	पुनन्तु मा देवजनाः०	,,	,,	,,	लिङ्गोक्ता	अनुष्टुप्
	४०	पवित्रेण पुनीहि मा०	,,	,,	,,	अग्निः	गायत्री
	४१	यत्ते पवित्रमर्चिष्यग्ने०	,,	,,	,,	,,	,,
		ब्रह्म तेन पुनातु मा ।	,,	,,	,,	ब्रह्म	,,
	४२	पवमानः सोऽअद्य०	,,	,,	,,	सोमः	,,

अनुष्टुभौ पित्र्याद्या द्वितीया यजमानाशीर्द्वे सृती त्रिष्टुब्देवयानपितृयाणौ पन्थानौ ब्रवीतीदꣳ हविस्त्र्यवसानाष्टिर्यजमानाशीः ॥३४॥ [य० अ० १९ मं० ३२–४८]

उदीरतां त्रयोदशर्चं पित्र्यं त्रैष्टुभꣳ शङ्खः, एकादशी तु जगत्याच्या जानुर्दशर्चोऽनुवाको, नव पित्र्या, दशम्यैन्द्री गायत्री, तृतीयाचतुर्थीनवम्योऽनुष्टुभस्त्रिष्टुभ इतराः, सोमो राजाष्टर्चमश्विसरस्वतीन्द्रा अपश्यन्नाद्यास्तिस्रो महावृहत्य उपान्त्या च, चतुर्थ्यन्ते अतिजगत्यौ, शेषे अतिशक्वर्यौ व्यवसाने, सीसेन तन्त्रमश्विसरस्वतीन्द्रदेवत्याः षोडश

४३	उभाभ्यां देव सवितः०	प्रजापतिः	अश्विनौ	सरस्वती		सविता		गायत्री
